# Nandibhillakritam Krishnanarayana Stotram

# નન્દિભિલ્લકૃતં કૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Nandibhillakritam Krishnanarayana Stotram

File name : nandibhillakRRitaMkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 85/47-64||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# નન્દિભિલ્લકૃતં કૃષ્ણનારાયણસ્તોત્રમ્

નન્દિભિલ્લ ઉવાચ ।
નમો નમસ્તે નિજરક્ષકાય નમો નમસ્તેઽન્યવિનાશકાય ।
નમો નમસ્તે શિવસઙ્ગ્રહાય કલાધિનાથાય નમો નમસ્તે ॥ ૪૭॥

નમો નમસ્તે બહુમોહનાય નમોઽતિગર્વિષ્ઠસુશાસકાય ।
નમો હૃદિસ્થાય પરેશ્વરાય ચાઽનાદિનારાયણ તે નમોઽસ્તુ ॥ ૪૮॥

નમોઽક્ષરેશાય પરાવરાય નમો નમસ્તેઽખિલકારણાય ।
નમઃ સમસ્તાઙ્ગજતત્ત્વગર્ભપ્રપૂરકાયાચ્યુત તે નમોઽસ્તુ ॥ ૪૯॥

નમોઽવતારિન્નવતારધર્ત્રે હ્યનન્તમુક્તાઽભિનિષેવિતાય ।
અનાદિકૃષ્ણાય પરેશ્વરાય નારાયણાયેતિ નમોઽસ્તુ તુભ્યમ્ ॥ ૫૦॥

શ્રીકાન્તરૂપાય રમેશ્વરાય રાધાધિનાથાય નમો નમસ્તે ।
નમોઽસ્તુ તે શ્રીપુરપાલકાય ભૂમન્નમસ્તે લલિતેશ્વરાય ॥ ૫૧॥

સર્વેશ્વરીશાય સમસ્તસર્વેશ્વરેશ્વરેશાય નમોઽસ્તુ તુભ્યમ્ ।
વૈરાજનાથાય જગન્નિયન્ત્રે માયેશ્વરાયાઽચ્યુત તે નમોઽસ્તુ ॥ ૫૨॥

પિતૃર્ષિદેવર્ષિશરીરકાય ચરાચરાન્તઃસ્થ ચ તે નમોઽસ્તુ ।
શ્રીમાણિકીપાશવતીશ્વરાય પ્રશાધિનાથાય નમોઽસ્તુ તુભ્યમ ॥ ૫૩॥

બ્રહ્મપ્રિયાવામનિવાસકાય હરિપ્રિયાદ્યાભિરભિષ્ટુતાય ।
કૃતસ્થલી કુઙ્કુમવાપિકાય ગોપાલબાલાય નમો નમસ્તે ॥ ૫૪॥

શ્રીકમ્ભરામાતૃભવાય કૃષ્ણનારાયણશ્રીશ ચ તે નમોઽસ્તુ ।
સાધુસ્વરૂપાય મખાત્મકાય સ્વામિન્નમસ્તે રણરઞ્જનાય ॥ ૫૫॥

જન્મસ્થિતિભ્રંશકરાય વિષ્ણો જિષ્ણો નમસ્તે પરમેશ્વરાય ।
સદ્ભક્તલભ્યાય કૃપાવશાય શક્તાય કાલાય નમો ભવાય ॥ ૫૬॥

રુદ્રાય બાણાય રથાય શાસ્ત્રે યમાય ધર્માય નમો દ્વિજાય ।

પ્રાણાય જીવાય તદાત્મને તેઽન્વિતાય રિક્તાય નમોઽવ્યયાય ॥ ૫૭॥

નાગસ્વરૂપાય મદન્તકાય હૃદ્યાય નિર્વાણકરાય ધાત્રે ।
શીઘ્રં શરણ્યં ત્વમભિપ્રપદ્ય નયાક્ષરં મોક્ષપદં હરે મામ્ ॥ ૫૮॥

કૃતાપરાધં બહુગર્વદૃબ્ધં પરશ્રિયં વીક્ષ્ય સદા જ્વલન્તમ્ ।
રણે સ્થિતં પ્રાણગતિં ત્યજન્તં ક્ષમાપ્ય સર્વં નય મોક્ષણં તે ॥ ૫૯॥

સર્વજ્ઞ સર્વેશ સમસ્તચક્ષુઃ સમસ્તકર્ણાઽત્મમનસ્સુ સંસ્થ ।
દિવ્યં નિજં દર્શનમત્ર દેહિ મૃતાન્સમસ્તાઁશ્ચ સમુદ્ધરાઽત્ર ॥ ૬૦॥

હરેઽગ્નિરાતેન વિબોધિતેન મયાપિ ગર્વાદવમાનિતસ્ત્વમ્ ।
અતોષદાવાનલમધ્યમાપ્તં સમુદ્ધર શ્રીશ વિધેહિ દિવ્યમ્ ॥ ૬૧॥

સ્વર્ગં યથા વા નરકં મદર્થં યદસ્તિ તત્તેઽર્પિતમત્ર કૃષ્ણ ।
પ્રપન્નજીવં પરલોકયાનં નયાઽક્ષરં ધામ વિનાશ્ય પાપમ્ ॥ ૬૨॥

હરે કૃષ્ણ હરે વિષ્ણો કૃષ્ણનારાયણ પ્રભો ।
તવાસ્મીતિ તવાસ્મીતિ મોક્ષં માં નય માધવ ॥ ૬૩॥

ઇત્યુક્ત્વા મૌનમાદાય કૃતાઞ્જલિર્હૃદન્તરે ।
વિવેશ નન્દિભિલ્લો વૈ સ્મરન્ ધ્યાયન્ પ્રભું પતિમ્ ॥ ૬૪॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ તિષ્યસન્તાનાત્મકસ્ય ચતુર્થખણ્ડે
૮૫-અધ્યાયાન્તર્ગતં નન્દિભિલ્લકૃતં કૃષ્ણનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૪। અધ્યાય ૮૫/૪૭-૬૪॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 85/47-64..

Proofread by PSA Easwaran

---

*Nandibhillakritam Krishnanarayana Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*